# प्राचीन भारते प्राणिभिरापदां पूर्वानुमानम्

**प्रवेश व्यास*, देवी प्रसाद त्रिपाठी****

*praveshvyas87@gmail.com, dptripathi@gmail.com*

## शोधसार

*प्राचीनाचार्यैः अस्य जगतः सर्वेषां रहस्यानामुद्घाटनस्य प्रयासः कृतः | ते आचार्याः जगतः प्रत्येककार्यस्य कारणं सतत अन्वेषणेन स्वीया अन्तर्दृष्ट्या च ज्ञातवन्तः | अणोरणीयान्महतो महीयान् समेषां तत्त्वानां विवेचनं तैः कृतम् | तज्ज्ञानं लोककल्याणाय सर्वेभ्यः बोधितवन्तः लिखितवन्तश्च | तज्ज्ञानमेव इदानीं वेदादारभ्य विस्तृतसंस्कृतवाङ्ग्मयरूपेण अस्माकं सम्मुखे विद्यमानं वर्तते |*

लोके इदानीं विभिन्नस्थानेषु जलप्लावनम् ,भूकम्पादिरूपेण आपदः दृश्यन्ते तथैव प्राचीनकालेऽपि भवन्ति स्म | आधुनिकवैज्ञानिकाः वदन्ति यत् एतादृशैः आपद्भिरेव पुराकाले 'डायनासोर' अभिधानात्मकानां प्राणिनां विनाशमभवत् | अतः सततरूपेण लोके आपदः भवन्त्येव | एतादृशाः आपदः वैदिक कालेऽपि ऋषिभिः दृष्टाः | लोककल्याणाय आपदां शान्तिः भवेदिति प्रार्थनापि कृता | यत्किमपि प्रकृत्याः विरुद्धं दृष्टं, आचार्यैः तस्य 'उत्पात' संज्ञा प्रदत्ता |[1] यथा अथर्ववेदस्य मन्त्रेऽस्मिन् दृश्यते –

**उत्पाताः पार्थिवान्तरिक्षाः शं नो दिविचरा ग्रहाः ||**
**शं नो भूमिर्वेप्यमाना शमुल्का निर्हतं च यत् |**
**नक्षत्रमुल्काभिहतं शमस्तु नः शं नोऽभिचाराः शमु सन्तु कृत्याः|**
**शं नो निरवाता वल्गाः शमुल्का देशोपसर्गा शमु नो भवन्तु ||[2]**

यतो हि वेदानां परमोद्देश्यमिष्टप्राप्तिरनिष्टपरिहारमासीत् तथैव प्राचीनऋषीणामपि| अथवा अनिष्टपरिहारस्य एतदेव उद्देश्यमधिकृत्य ऋषिभिः वेदानां रचना कृता | अतएवानिष्टपरिहारार्थं लोकानां विनाशकानां आपदां संदर्भेऽपि तैः विचारितम्| इदानीं आधुनिकविज्ञाने प्रत्येकस्मिन् क्षेत्रे कल्पनातीतं विकासं प्रचलति| नूतनाविष्काराः क्रियन्ते| तथापि ते इदानीं पर्यन्तं आपदां पूर्वानुमाने पूर्णत असमर्था एव |[3] परन्तु प्राचीनाचार्यै उक्तं यत् आपदां पूर्वानुमानस्य विधिरपि प्रकृतौ एव प्राप्तुं शक्यते | अस्मिन् जगति यत्किमपि शुभाशुभं घटति, प्रकृतौ पूर्वमेव तस्याः भूमिकायाः निर्माणं भवति | यथा कस्यापि भित्तेः पतनं भवति, परन्तु तस्य पतनं सूक्ष्मरूपेण बहुकालात् पूर्वमेव आरम्भः भवति | वयं तज्ज्ञातुं समर्थाः न भवामः, परन्तु जन्तवः तस्य ज्ञानं कर्तुं समर्थाः भवन्ति अतएव श्वानबिडालादिप्राणिनः पूर्वमेव रोदनं आरम्भं कुर्वन्ति, ततः पलायनं कुर्वन्ति | ते बहुकालात् पूर्वमेव तस्य भित्ते पत्तनं जानन्ति | प्रकृतौ यत्किमपि घटितं

*** शोधच्छात्र ,ज्योतिष विभाग ,श्री लाल बहादुर शास्त्री राष्ट्रीय संस्कृत विद्यापीठम् ,नई दिल्ली- १६|**

**** प्रोफेसर ,ज्योतिष विभाग ,श्री लाल बहादुर शास्त्री राष्ट्रीय संस्कृत विद्यापीठम् ,नई दिल्ली- १६|**

1 प्रकृतेरन्यथोत्पाताः,अद्भुतसागर, उपोद्घातः
2 अथर्ववेद, १९,९,७-१०
3 "Unfortunately, there is still no way to predict when an earthquake will strike" - http://en.wikipedia.org/wiki/Earthquake_prediction

भवति तस्य पूर्वनिमित्ताः लोके ब्रह्माण्डे च दृष्यन्ते |[1] प्राचीनाचार्याः एतत् ज्ञातवन्तः | अतः कारणादेव भविष्ये संभावितघटनानां ज्ञानार्थे प्राकृतिक-ब्रह्माण्डीयपरीवर्तनानामध्ययनमावश्यकं भवति | अतएव वराहमिहिराचार्येण बृत्संहितायां लिखितं यत् प्रतिक्षणं वातावरणस्य ब्रह्माण्डस्य च सतत परीवर्तनानामध्ययनेन भविष्ये संभावितानां घटनानां ज्ञानं कर्तुं शक्यते| अतः चतुर्षु दिक्षु सततरूपेण दैवज्ञस्य अवधानं भवेत् | अतः चत्वारः नक्षत्रदर्शकानां दैवज्ञानां नियुक्तिः कार्या, येन प्रकृतौ ब्रह्माण्डे च प्रतिक्षणपरिवर्तनानां ज्ञानं भवेत् –

**"तानि शुभाऽशुभ निमित्तानि सामान्यानि च जगतः प्रतिपुरुषं पार्थिवे च प्रतिक्षणमनन्यकर्माभियुक्तेन दैवज्ञेन चिन्तयितव्यानि| न चैकाकिना शक्यन्तेऽहर्निशमवधारयितुं निमित्तानि| तस्मात्सुभृतेनैव दैवज्ञेनान्येऽपि तद्विदश्चत्वारः कर्तव्याः | तत्रैकेनैन्द्री चाग्नेयी च दिगवलोकयितव्या| याम्या नैर्ऋति चान्येनैव वारुणी वायव्या चोत्तरा चेशानी चेति | यस्मादुल्कापातादीनि शीघ्रमपगच्छन्तीति | तस्याश्चाकार वर्णस्नेह प्रमाणादि ग्रहार्क्षोपघातादिभिः फलानि भवन्ति|[2]"**

तथा चोक्तम् विवेकविलासे -

**स्ववास देशक्षेमाय निमित्तान्यवलोकयेत् |तस्योत्पातादिकं वीक्ष्य त्यजेत्तं पुनरुध्यमी ||[3]**

एवं प्रकारेण अनेक वर्षाणामन्वेक्षणोपरान्तं ज्योतिषशास्त्रस्य संहिता ग्रन्थानां निर्माणमभवत् | तैः दैवज्ञैः रात्रौ अन्तरिक्षे उल्कापाताः, ग्रहयुद्धं, दिग्दाहादि दृष्टम् , दिवाकाले संध्याकाले च वृक्षाणां, जन्तूनां, मेघानां वैचित्र्यम् दृष्टम् | एतेषां वैचित्र्यानां फलान्यपि कालान्तरेण दृष्ट्वा, तैः संहिता ग्रन्थेषु तेषां वर्णनं कृतम् | संहिता ग्रन्थेषु उक्तं यत् संध्याकाले विविधानि निमित्तानि दर्शनीयानि भवन्ति , तेषां सम्यगध्ययनेन शुभाशुभफलानि ज्ञातव्यानि भवन्ति | अतएव उक्तं – **न असांवत्सरिके देशे वस्तव्यं भूतिमिच्छता[4]** यथा पशवः, पक्षिणः, वायुः, अर्कचन्द्रमसोः परिवेषाः, परिधिः, प्रतिसूर्यः, भास्करस्योदयेऽस्तमये वा तिर्यक्स्थिता मेघरेखा , इन्द्रधनुः, गन्धर्वनगरम्, सूर्यरश्मयः,रजः, अभ्रवृक्षः, दण्डो रविकिरणजलदमरुतां सङ्घातादयः –

**मृगशकुनिपवनपरिवेषपरिधिपरिघाभ्रवृक्षसुरचापैः |**
**गन्धर्वनगररविकरदण्डरजः स्नेहवर्णैश्च ||[5]**

यतो हि जन्तवः प्रकृत्याः सामीप्ये निवसन्ति | प्राकृतिकपरिवर्तनानां ज्ञानं तेभ्यः प्रथमतो भवति | अतः तेषां घटनायाः प्रागेव प्रतिक्रिया भवति | पशुपक्षिणामस्याः क्षमतायाः सूक्ष्मरूपेण अध्ययनं प्राचीनाचार्यैः कृतम् | इदानीमपि ग्रामेषु वृद्धजनाः पक्षिणां पशुनाञ्च व्यवहारं दृष्ट्वा वर्षायाः पूर्वानुमानं कुर्वन्ति | परन्तु ज्ञानमेतत् आङ्गलशिक्षायाः प्रभावात् विलुप्ततां गच्छन्नस्ति | परन्तु ज्ञानं तु शाश्वतम्भवति,

---

1 "Whatever is born or done at the moment has the qualities of this nature and moment" – Dr. C. Jung

2 बृहत्संहिता, सांवत्सरसूत्राध्याय, श्लोक-२१

3 विवेकविलास, अष्टमोल्लास ,श्लोक-५

4 बृहत्संहिता, सांवत्सरसूत्राध्यायः, श्लोक २९

5 बृहत्संहिता, संध्यालक्षणाध्यायः, श्लोक२

तस्य कदापि लोपः न भवति | यस्य ज्ञानस्य हानिः भारते जाता तस्य पुनरुद्भवः विश्वस्य अन्यभागेषु अभवत् | तथैव आपदां पूर्वानुमानविषयेऽपि अभवत् | आधुनिकविज्ञाने बहुकालं यावत् पशुपक्षिणां व्यवहारमापदां पूर्वानुमानरूपेण स्वीकृतं न आसीत् | परन्तु 1975 तमे वर्षे चीनदेशे केवलानां सरीसृपाणां विविधजन्तूनां च व्यवहारं दृष्ट्वा केचनदिनानां पूर्वमेव आपदायाः भविष्यवाणी कृता |[1] हेचिङ्ग देशस्य जनाः अन्यत्र प्रस्थापिताः| दिन द्वयोपरान्तमेव 7.3M शक्तेः भूकम्पः तत्र घटितः | सहस्राधिकजनानां प्राणाः रक्षिताः |[2] तदनन्तरमेव वैज्ञानिकैः प्राणिनां विचित्रव्यवहारः आपदां पूर्वानुमानस्य मानकविधिरूपेण स्वीकृतः | अनन्तरं विषयेऽस्मिन् बहूनि शोधकार्याणि प्रचलितानि | इदानीमपि विविध देशेषु वैज्ञानिकाः विषयेऽस्मिन् शोधकार्यं कुर्वन्तः सन्ति | संपूर्णे विश्वे USGS (United states Geological Survey) नाम्ना एका सर्वमान्या संस्था अस्ति | या आपदां विषये सर्वाधिकं शोधकार्यं करोति | तत्रापि विषयेऽस्मिन् बहु शोधकार्यं प्रचलति | 'Nature' नाम्नि विश्वप्रसिद्धा संस्था द्वारा एकस्य वृत्तचित्रस्य (documentary) निर्माणं कृतं वर्तते | यस्मिन् तैः सर्वेषां जन्तूनां आपदाभिः पूर्वव्यवहारस्य वैज्ञानिकदृष्ट्या प्रायोगिकरूपेण विवेचनं कृतं वर्तते|[3] अनेकेषु देशेषु विज्ञानस्य एका शाखारूपेण स्वीकृत्य जन्तूनां विचित्र व्यवहारस्योपरि विश्वविद्यालयेषु शोधकार्याणि प्रचलन्ति , बहुधनव्ययमपि क्रियते | तादृशः प्रयासः अस्माकं प्राचीनाचार्यैरपि कृतः | आदिकाव्य रामायणादारभ्य महाभारते, पुराणेषु ,विशेषतया ज्योतिषशास्त्रस्य संहिता ग्रन्थेषु प्राचुर्येण आपदाभिः पूर्वं जन्तूनां विचित्रव्यवहारस्य वर्णनं प्राप्यते | इदानीं वैज्ञानिकाः शोधकार्ये रताः सन्ति, यत् के के प्राणिनः आपदां पूर्वानुमाने समर्थाः वर्तन्ते | अस्योत्तरं वराहमिहिराचार्येण(499-587A.D.) रचितायां बृहत्संहितायां प्राप्यते | वराहामिहिराचार्येण ग्रन्थे केषां केषां जन्तूनामध्ययनं कर्तव्यमिति निर्दिष्टम् | तेषां दिनचर-रात्रिचर-उभयचररूपेण विभागाः कृताः | आधुनिकवैज्ञानिका अपि शोधकार्ये रताः सन्ति यत् भूकम्पाद्यापदां पूर्वानुमानार्थे केषां प्राणिनामुपयोगः स्यादिति | वराहमिहिराचार्येण प्रदत्तानि नामानि आधुनिकशोधकर्तृणां कृतेऽपि बहुलाभाय भविष्यन्ति | बृत्संहिताया विरुताध्याये निर्दिष्टम् -

**श्यामाश्येनशशघ्नवञ्जुलशिखिश्रीकर्णचक्राह्वयाश्चा**
**षाण्डीरकखञ्जरीटकशुकध्वाङ्क्षाः कपोतास्त्रयः|**
**भारद्वाजकुलालकुक्कुटखरा हारीतगृध्रौ कपिः**
**फेण्टः कुक्कुटपूर्णकूटचटकाः प्रोक्ता दिवासञ्चराः ||**
**लोमाशिका पिङ्गलछिप्पिकाख्यौ वल्गूल्युलूकौ शशकश्च रात्रौ|**
**सर्वे स्वकालोत्क्रमचारिणः स्युर्देशस्य नाशाय नृपान्तदा वा ||**
**हयनरभुजगोष्ट्रद्वीपीसिंहर्क्षगोधा वृकनकुलकुरङ्गश्वाजगोव्याघ्रहंसाः|**

---

1 .http://www.oakton.edu/user/4/billtong/eas100/abnorm_anim_behav_earthquakes.pdf

2 "Abnormal Animal Behavior and the Prediction of Earthquakes" by William K. Tong , Department of Earth Sciences, Northeastern Illinois University, august 1988

3 "Can Animals Predict Disaster? : A Review" Lisa Snay, Massachusetts Academy of Mathematics and Science

**पृषतमृगशृगालश्वाविदाख्यान्यपुष्टा द्युनिशमपि बिडालः सारसः सूकरश्च ||[1]**
**एवं देशे देशे तद्विद्भ्यः समुपलभ्य नामानि |**
**शकुनरुतज्ञानार्थं शास्त्रे सञ्चिन्त्य योज्यानि||[2]**

अर्थात् श्यामा पोतकी (female cuckoo),श्येनो वाजिकः (hawk), शशघ्नः (the hare killer, falcon), वञ्जुलः खदिरचञ्चु(Vaňjula bird), शिखि मयूरः (peacock), श्रीकर्ण(Srikarna), चक्राह्वयाश्चक्रवाकः (Ruddy goose), चाषः(blue jay) अण्डीरक(Andiraka), खञ्जरीटक(Wagtail), शुक(parrot), ध्वाङ्क्षाः काकः (crow), कपोतास्त्रयः अपाण्डुरश्चित्रकपोतः कुङ्कुमधूम्रश्चेति (dove of three kinds- viz grey, variegated and saffron-coloured), भारद्वाज(skylark), कुलालकुक्कुटः गर्ताकुक्कुटः (wild cock) खरः गर्दभः (donkey), हारीतगृध्रौ (a kind of pigeon and vulture), कपिः वानरः (Monkey), फेण्टः(a kind of bird), कुक्कुट कृकवाकुः (cock), पूर्णकूटः करायिकः (otherwise known as Kārayika), चटकाः कलविङ्कः(Sparrow) एते सर्वे दिवसचराः प्रोक्ताः | लोमाशिका(the hair eater, jackal), पिङ्गल उलूकचेटी (Crane), छिप्पिकाख्यौ(a bird), वल्गूल्युलूकौ(flying fox and owl), शशकश्च(hare) एते रात्रौ चरन्ति | यदि सर्वे स्वकालोत्क्रमचारिणः स्युः अर्थात् यदि रात्रिचराः दिवा चरन्ति दिवाचराश्च रात्रौ चरन्ति तदा देशस्य नाशः नृपस्य नाशो वा भवति | हयोऽश्वः (the horse) नरो मनुष्यः(man) भुजगः सर्पः (snake) उष्ट्रः करभः (camel) द्वीपी चित्रकः (leopard) सिंहो हरिः(lion) ऋक्षः(bear) गोधा(alligator) वृको मृगजातिः (wolf) नकुलः प्रसिद्धो बिलेशयः प्राणी (mongoose) कुरङ्गो हरिणः (deer) श्वा सारमेयः(dog) अजश्छागः(goat) गौः (cow) व्याघ्रः (tiger) हंसः पक्षी (swan) पृषतो मृगजातिः (spotted antelope) मृगः (stage) शृगालः क्रोष्टुकः(jackal) श्वाविद् बिलेशयः प्राणी श्वाविदित्याख्या नाम यस्य (porcupine) अन्यपुष्टः कोकिलः(cuckoo) बिडालो मार्जारः (cat) सारसः(crane) सूकरो वराहः(boar) एते द्युनिशमपि चरन्ति अर्थात् एते रात्रौ दिवा उभये काले च चरन्ति ||[3] एते जन्तवः शुभाशुभज्ञानाय सततरूपेण दृष्टव्या | इदानीं पृथक्त्वेन विविधैः ग्रन्थैः प्रत्येकस्य जन्तोः आपदाभिः पूर्वस्य व्यवहारस्य विषये जानीमः –

1 बृत्संहिताया विरुताध्याय, श्लोक१-३
2 बृत्संहिताया विरुताध्याय, श्लोक१०
3 English names of animals are taken from the english translation of the "Brihatsamhita" by Ramakrishna Bhatt published from Motilal Banarasidas,1987

## 1.पक्षिणः(Birds)





पक्षिणः अनिष्टस्य पूर्वं निमित्तान् सूचयन्ति | रामायणे बहुषु स्थानेषु पक्षिभि आपदां पूर्वानुमान विषये उल्लिखितं वर्तते | यथा बालकाण्डे वर्णितमस्ति यत् तत्काले श्रीरामचन्द्रेण ऋषिगणेन च सह गच्छता दशरथस्य परितः भयङ्करशब्दं कुर्वन्तः पक्षिणः विचरन्ति स्म | मृगाः प्रदक्षिणं दिशि गच्छन्ति स्म -

**घोरास्तु पक्षिणो वाचो व्याहरन्ति समन्ततः | भौमाश्चैव मृगाः सर्वे गच्छन्ति स्म प्रदक्षिणम् ||**[1]

तान् सर्वान् निमित्तान् दृष्ट्वा दशरथः ऋषिवशिष्ठं पृष्टवान् यत् " मुनिवर्य , शुभाशुभ शकुनानि एकस्मिन्नेव काले कथं परिदृश्यन्ते ?"

**तान् दृष्ट्वा राजशार्दूलो वसिष्ठं पर्यपृच्छत | असौम्याः पक्षिणो घोरा मृगाश्चापि प्रदक्षिणाः| |**[2]
**किमिदं हृदयोत्कम्पि मनो मम विषीदति |**[3]

तदानीं महर्षिवसिष्ठ उक्तवान् – " राजन , आकाशे पक्षिणः तु अनिष्टस्य सूचनां दर्शयन्ति परन्तु दक्षिणतो गच्छताः मृगाः तस्य अनिष्टस्य शान्तिं प्रदर्शयन्ति, अतः भवान चिन्ता मा कुरु |"

**उपस्थितं भयं घोरं दिव्यं पक्षिमुखाच्च्युतम् ||**[4]
**मृगाः प्रशमयन्त्येते संतापस्त्यज्यतामयम् |**

एवं प्रकारेण दर्शितस्य निमित्तस्य किञ्चित् कालोपरान्तं भयङ्करवातः प्रवहितः , दीर्घाः वृक्षा अपि भूमौ पतिताः | सूर्य अन्धकारेणाच्छन्नोऽभवत्| सर्वेः दिग्भ्रमिताः जाताः | अत्यधिकरजोत्पत्तिकारणात् किमपि दृष्टुमसमर्था सेना मूर्छिता अभवत् -

**तेषां संवदतां तत्र वायुः प्रादुर्बभूव ह ||**[5]
**कम्पयन् मेदीनीं सर्वां पातयंश्च महाद्रुमान् |तमसा संवृतः सूर्यः सर्वे नावेदिषुर्दिशः ||**[6]

---

1 रामायण,बालकाण्ड, अध्याय७४, श्लोक९
2 रामायण,बालकाण्ड, अध्याय७४, श्लोक१०
3 रामायण,बालकाण्ड, अध्याय७४, श्लोक११
4 रामायण,बालकाण्ड, अध्याय७४, श्लोक१२
5 रामायण,बालकाण्ड, अध्याय७४, श्लोक१३
6 रामायण,बालकाण्ड, अध्याय७४, श्लोक१४

**भस्मना चावृत्तं सर्वं संमूढमिव तद्बलम् |**[1]

रामायणस्य युद्धकाण्डे विभीषणः रावणं दुर्निमित्तान् सूचयति यत् लङ्कायां प्रासादस्योपरि गृहाणामुपरि च काकाः एकत्रितो भूत्वा ग्रामस्योपरि शब्दानि कुर्वन्तः दृश्यन्ते -

**वायसाः संघशः क्रूरा व्याहरन्ति समन्ततः |समवेताश्च दृश्यन्ते विमानाग्रेषु संघशः ||**[2]

लंकापुर्योपरि गृध्राः समूहरूपेण उड्डयन्ति | संध्याकाले शिवा नगरस्य समीपे आगत्य अशुभ शब्दं कुर्वन्ति-

**गृध्राश्च परीलीयन्ते पुरीमुपरि पिण्डिताः |**[3]

एवं प्रकारेण विभीषणः प्राणिभिः प्रदर्शितानां दुर्निमत्तान् दृष्ट्वा आगतापदां पूर्वानुमानं करोति |

युद्धकाण्डस्य त्रयोविंशतितमे अध्याये श्रीरामः लक्ष्मणं प्रति उत्पातानां वर्णनं करोति यत् पक्षिणः दैन्याकारं धृत्वा सूर्याभिमुखं दीनतापूर्वकस्वरैः चीत्कारं कुर्वन्तः महान् भयं सूचयन्ति -

**दीना दीनस्वराः क्रूराः सर्वतो मृगपक्षिणः | प्रत्यादित्यं विनर्दन्ति जनयन्तो महद्भयम् ||**[4]

काकाः, श्येनाः, अधम गृध्राः चतुर्दिक्षु उड्डयन्ति, शृगालाः अशुभसूचकं भयंकरशब्दं कुर्वन्ति |

**काकाः श्येनास्तथा नीचा गृध्राः परिपतन्ति च |**[5]

तथैव वराहमिहिराचार्येण स्वकीये बृहत्संहिता ग्रन्थे वर्णितमस्ति यत् संध्याकाले सूर्याभिमुखै पक्षिभिः कृताः शब्दाः देशस्य नाशं सूचयन्ति तथा तैरेव सूर्याभिमुखैर्ग्रामस्य, याम्यदिशि कृताः शब्दाः पुरस्य ग्रहणाय भवन्ति अर्थात् तत्पुरमन्यैः गृह्यते इति –

**दीप्तमृगाण्डजविरुता प्राक् संध्या देशनाशमाख्याति |**
**दक्षिणदिक्स्थैर्विरुता ग्रहणाय पुरस्य दीप्तास्यैः ||**[6]

सूर्याभिमुखैर्विहङ्गैः अरण्यप्राणिभिः च कृतशब्दा, तथा दण्डेन रजसा परिघेण च संयुक्ता, प्रतिदिनमर्कविकारयुता संध्या देशस्य जनपदस्य राज्ञः सुभिक्षस्य च नाशाय भवति -

**दीप्तविहङ्गशिवामृगघुष्टा दण्डरजःपरिघादियुता च |**
**प्रत्यहमर्कविकारयुता वा देशनरेशसुभिक्षवधाय ||**[7]

---

1 रामायण,बालकाण्ड, अध्याय७४, श्लोक१५ पूर्वार्ध

2 रामायण,युद्धकाण्ड, अध्याय१०, श्लोक१९

3 रामायण,युद्धकाण्ड, अध्याय१०, श्लोक२०

4 रामायण,युद्धकाण्ड, अध्याय२३, श्लोक७

5 रामायण,युद्धकाण्ड, अध्याय२३, श्लोक११

6बृहत्संहिता, संध्यालक्षणाध्यायः, श्लोक५

7 बृहत्संहिता, संध्यालक्षणाध्यायः, श्लोक३०

पक्षिभिः प्रदर्शितस्य उत्पातास्य फलं कदा भविष्यतीति प्रश्ने सति वराहमिहिरः वर्णयति यत् पक्षिणः संध्याकृतं फलं तस्मिन्नेव दिने कुर्वन्ति परन्तु अरण्यप्राणिनः सप्ताहमध्ये फलं कुर्वन्ति -

**तस्मिन्नेव दिनेऽष्टमेऽथ विहगाः सप्ताहपाका मृगाः ||**[1]

महाभारतेऽपि बहुत्र पक्षिभिः आगतापदां सूचना निर्दिष्टा वर्तते | पाण्डवानां जयः कौरवाणाञ्च पराजयस्य लक्षणान् प्रदर्शयन्  कर्णः भगवान्  श्रीकृष्णं प्रति वदति यत् संध्याकाले कृष्णग्रीवायुक्ताः रक्तवर्णपादयुक्ताः भयानकाः पक्षिणः सम्मुखे आयान्ति -

**कृष्णग्रीवाश्च शकुना रक्तपादा भयानकाः | संध्याभिमुखा यान्ति तत् पराभवलक्षणम् ||**[2]

भीष्म पर्वणि महर्षि वेदव्यासः धृतराष्ट्रं प्रति भयसूचकान् उत्पातान् प्रदर्शयति यत् श्येनाः, गृध्राः, काकाः, बकाः, कङ्काः समूहरूपेण एकत्रिताः भवन्ति वृक्षानामग्रभागे च तिष्ठन्ति –

**श्येना गृध्राश्च काकाश्च कङ्काश्च सहिता बकैः |संपतन्ति नगाग्रेषु समवायांश्च कुर्वते ||**[3]

अन्येऽपि शुकाः, मयूराः  कोकिलादि पक्षिणः भयपूर्वकशब्दान्  कुर्वन्ति -

**कोकिला शतपत्राश्च चाषा भासाः शुकास्तथा | सारसाश्च मयूराश्च वाचो मुञ्चन्ति दारुणाः ||**[4]

श्येनाः प्रकर्षेण रोदमाना इव भवन्ति तथा शृगालाः सूर्याभिमुखाः पुरद्वारे शब्दान्  कुर्वन्ति

कङ्काः पक्षिणः पूर्वमेव भयस्य सूचनां प्राप्त्वा कठोरशब्दान्  कुर्वन्  सेनाया मध्यतो दक्षिण दिशि गच्छन्ति -

**कङ्काः प्रयान्ति मध्येन दक्षिणामभितो दिशम् ||**[5]

युद्धकालस्य पूर्वं पक्षिणः भयंकरशब्दाः कुर्वन्तः आकाशे भ्रमन्तः दृश्यन्ते -

**पक्षिणश्च महाघोरं व्याहरन्तो विबभ्रमुः |**[6]

सञ्जयः कौरव सेनाया कृते भयसूचकान् दुर्निमित्तान् वर्णयति यत् कङ्काः गृध्राः बलाकाः भयसूचकान् शब्दान्  कुर्वन्ति -

**कङ्का गृध्रा बलाकाश्च व्याहरन्ति मुहुर्मुहुः |**[7]

बृहत्संहितायां गृध्रसमूहस्य फलं दशदिवसेषु भवतीति निर्दिष्टं वर्तते |[1]

---

1 बृहत्संहिता, संध्यालक्षणाध्यायः, श्लोक३१
2 महाभारत, उद्योगपर्व, अध्याय१४६, श्लोक२६
3 महाभारत,भीष्म पर्व,अध्याय-२, श्लोक१७
4 महाभारत,भीष्म पर्व,अध्याय-२, श्लोक२८
5 महाभारत,भीष्म पर्व,अध्याय-२, श्लोक१९
6 महाभारत,भीष्म पर्व,अध्याय९९,श्लोक२२
7 महाभारत,भीष्म पर्व,अध्याय११२,श्लोक८

श्रीमद्भागवते युधिष्ठिरः वदति यत् कपोताः , उलूकाः, काकाः कठोरशब्दैः मनः कंपयन्तः अनिष्टं सूचयन्ति -

**मृत्युदूतः कपोतोऽयमुलूकः कम्पयन् मनः |प्रत्युलूकश्च कुह्वानैरनिद्रौ शून्यमिच्छतः ||**[2]

### काकः (Crow)



पक्षिष्वपि काकस्य विषये विशेषरूपेण वर्णनं प्राप्यते | काकस्य नीडनिर्माणवशादपि दुर्भिक्षस्य सूचना भवति | यथा वर्णितं वराहमिहिरेण –

**वैशाखे निरुपहते वृक्षे नीडः सुभिक्षशिवदाता |**
**निन्दतकण्टकिशुष्केष्वसुभिक्षभयानि तद्देशे ||**[3]

अर्थात् यस्मिन् देशे काकः कुत्सिते सकण्टके शुष्क नीरसे वृक्षे स्वकीयं नीडं विनिर्माति तस्मिन् देशे दुर्भिक्षं भयं च करोति | तथा च –

**शरदर्भगुल्मवल्लीधान्यप्रासादगेहनिम्नेषु |शून्यो भवति स देशश्चौरानावृष्टिरोगार्त्तः ||**[4]

यदि काकः शरः, दर्भः, एकमूलः शाखासमूहः, वल्ली, धान्यं, देवप्रासादः, गृहः, निम्नप्रदेशः, एतेषु स्थानेषु स्वकीयं गृहं निर्माति तदा सः देशः जनशून्यो भवति | स देशः चौरैः, अनावृष्ट्या, रोगैः च पीडितो भवति |

**अनिमित्तसंहतैर्ग्राममध्यगैः क्षुद्भयं प्रविरुवद्भिः |रोधश्चक्राकारैरभिघातो वर्गवर्गस्थैः ||**[5]

यदि काकाः ग्राममध्ये एकत्रिताः अभवन् अकारणम् उच्चैः ध्वनिः कुर्वन्ति तदा क्षुद्भयं दुर्भिक्षभयं च कुर्वन्ति | यदि चक्रवत् पारिमण्डल्येन भ्रमन्ति तदा पुरस्य रोधः उपद्रवं च निर्दिशन्ति |

**दारुणनादस्तरुकोटरोपगो वायसो महाभयदः |**[6]

काकः तरुकोटरे अर्थात् वृक्षस्य गर्भे स्थितः दारुणं शब्दं यदि करोति तदा महद्भयं ददाति| काकानां स्वभावोयं ११९५ तमे ईस्वीवर्षे जापानदेशे भूकम्पात् पूर्वं दृष्टिपथि आगतम्।[1]

---

1 बृहत्संहिता,पाकाध्याय,श्लोक९
2 श्रीमद्भागवतमहापुराण, अध्याय१४,श्लोक १४
3 बृहत्संहिता, वायसविरुताध्यायः, श्लोक२
4 बृहत्संहिता, वायसविरुताध्यायः, श्लोक५
5 बृहत्संहिता, वायसविरुताध्यायः, श्लोक८
6 बृहत्संहिता, वायसविरुताध्यायः, श्लोक१७

**काकानामाकुलं रात्रौ बहवः स्थाननाशदाः |**[2]

काकाः यदि रात्रौ व्याकुलाः भवन्ति तदा देशस्य नाशं भवति |

महाभारते महर्षिवेदव्यासः अमङ्गलसूचकान् उत्पातान् वर्णयति यत् काकाः वृक्षाणां शाखासु वामभागतः तिष्ठन्ति तथा च भयङ्करशब्दैः कोलाहलं कुर्वन्ति -

**शिखराणां समृद्धानामुपरिष्टात् समन्ततः |**
**वायसाश्च रुवन्त्युग्रं वामं मन्डलमाश्रिताः ||**[3]

श्वेतवर्णीया काकानां दर्शनमपि देशविनाशाय उक्तमस्ति –

**श्वेतकाकश्वगृध्रादि भ्रमणं देशनाशनम् ||**[4]

## 2. सरीसृपाः (Reptiles)





संस्कृत वाङ्गमये अनेकेषु स्थलेषु आपद्भिः पूर्वं सरीसृपानां विचित्रस्य व्यवहारस्य वर्णनं प्राप्यते | रामायणे अनेकेषु स्थलेषु प्राणिभि उत्पातानां सूचना निर्दिष्टाः | विशेषतः युद्धकाण्डस्य दशमे सर्गे विभीषणः रावणं दुर्निमित्तान् सूचयति | युद्धस्य पूर्वं सर्पाः पिपीलिकाश्च इतस्ततः परिभ्रमन्ति स्म| पाकस्थलेषु, अग्निशालासु, वेदाध्ययनस्थलेषु च दृष्यन्ते स्म –

**अग्निष्टेष्वग्निशालासु तथा ब्रह्मस्थलिषु च | सरीसृपाणि दृश्यन्ते हव्येषु च पिपीलिकाः ||**[5]

आपदां सूचना प्रास्वा सर्पाः स्वस्थानात् बहिरागत्य इतस्ततः भूमौ भ्रमन्ति | चीनदेशे हेचिङ्गनगरे सरीसृपानां विचित्र स्वभावं दृष्ट्वैव १९७५ वर्षे भूकंपस्य पूर्वानुमानं कृतम् |[6]

---

1 before the Kobe Earthquake (Wadatsumi, 1995) Crows (102; 13%) floced to a bamboo cluster at midnight, cawed loudly and restlessly (in keeping with the old proverb of noisy crows inviting disaster), and moved out to the suburbs (away from the epicenter)- **Precursors Before Recent Earthquakes Kobe, Izmit, Taiwan and India**

2 नारदसंहिता,अध्याय३७, श्लोक८

3 महाभारत,भीष्म पर्व,अध्याय३, श्लोक४३

4 विवेक विलास, जन्मचयनाम अष्टमोल्लासः ,श्लोक-१६

5 रामायण,युद्धकाण्ड, अध्याय१०, श्लोक१६

6 Chinese earthquakes, the 1976 Haicheng earthquake was the only one in winter (February), when snakes usually hibernate. Many observations both on the "amateur" and official level reported ahighly unusual amount of snake

आचार्यभद्रबाहुना वर्णितं यत् यदि सरीसृपाणां, पक्षिणां, द्विपदानां वर्षा भवति अर्थात् एते प्राणिनः यदि आधिक्येन लोके दृश्यन्ते तदा लोके महान भयं जनयन्ति -

**सरीसृपा जलचराः पक्षिणो द्विपदास्तथा |**
**वर्षमाणा जलाधरात् तदाख्यान्ति महाभयम् ||**[1]

सरीसृपेष्वपि सर्वाधिकतो मण्डूकानां संख्यायां वृद्धिः अनेकेषु स्थानेषु दृष्टा| इटली देशे "ला अक्विला" नगरे भूकम्पात् पूर्वं मण्डूकानां संख्यायाम् आश्चर्यजनकरूपेण वृद्धिः दृष्टाः[2] तथैव चीनदेशेऽपि २००८ तमे ईस्वीवर्षे भूकम्पात् पूर्वं मण्डूकानां संख्या अत्यधिकरूपेण परिवर्धिताः यथा चित्रे दृश्यते –




http://www.weirdasianews.com/2008/05/13/frog-migration-omen-to-china-earthquake-disaster

वराहमिहिराचार्येण मूषकानां, सर्पाणां वृद्धेः फलं मासत्रयाभ्यन्तरे निर्दिष्टम् वर्तते –

**कीटाखुमक्षिकोरगबाहुल्यं मृगविहङ्गविरुतं च |**
**लोष्टस्य चाप्सु तरणं त्रिभिरेव विपच्यते मासैः ||**[1]

---

sightings even in the weeks prior to the earthquake - "Animal Modeling of Earthquakes and Prediction Markets" by Adi Schytzer and Yisrael Schnytzer, Department of Economics and Life Sciences, Bar ILan University, Israel

1 भद्रबाहु संहिता, अध्याय१४, श्लोक१४

2 The most recent and perhaps convincing example was observed before the 2009 L'aquila earthquake in Italy (M = 6.3). Grant and Halliday (2009) observed a decline of 96% in the number of male toads active around a known and well studied breeding site 5 days before the earthquake -"Predicting the unpredictable; evidence of pre-seismic anticipatory behavior in the common toad" by R.A. Grant & T. Haillidav. Journal of Zoology, Department of life Sciences, The Open University, Milton Keynes, UK & Oxford,UK

## 3. श्वानः (Dogs)





**सङ्गीतवद्रोदनवदुन्नमय्य शिरोधराम् ।**
**व्यमुञ्चन् विविधा वाचो ग्रामसिंहास्ततस्ततः ॥[2]**

श्रीमद्भागवते वर्णितमस्ति यत् अशुभस्य पूर्वसूचनां प्राप्त्वा यत्र तत्र कुक्कुराः ग्रीवामुपरि कृत्वा कदाचित् रुदन्ति कदाचित् गायन्ति विभन्नाः ध्वनिः कुर्वन्ति ।

**सूर्योन्मुखः श्वानलदिक्स्थितश्च चौरानलत्रासकरोऽचिरेण ।**
**मध्याह्नकालेऽनलमृत्युशंसी संशोनितः स्यात् कलहोऽपराह्णे ॥[3]**

यदि श्वानः आदित्याभिमुखः आग्नेय्यभिमुखो वा विरौति तदा शीघ्रकालेनैव तस्करैः अग्निना च भयं करोति । मध्याह्नसमये सूर्याभिमुखो भूत्वा रौति अग्निभयं मरणं च करोति । अपराह्णे तृतीये प्रहरे सूर्याभिमुखो भूत्वा यदि रुदति तदा रक्तसहितः कलहः भवेदिति ज्ञेयम् ।

**खंखेति चोचैश्च मुहुर्मुहुर्ये रुवन्ति दण्डैरिव ताड्यमानाः ।**
**श्वानोऽभिधावन्ति च मण्डलेन ते शून्यतां मृत्युभयं च कुर्युः ॥[4]**

यदि कुक्कुराः उच्चैः प्रतिक्षणं खंखेति शब्दं कुर्वन्ति अर्थात् “खंख” इत्येवं प्रकारेण शब्दं यदि कुर्वन्ति । अथवा यदि मण्डलाकृतिना समूहेन परिवर्तुलेन धावन्ति तदा ते नगरस्य शून्यतां मृत्युभयं च कुर्वन्ति ।

**ग्रामस्य मध्ये यदि वा पुरस्य भषन्ति संहत्य मुहुर्मुहुर्ये ।**
**ते क्लेशमाख्यान्ति तदीश्वरस्य श्वारण्यसंस्थो मृगवद्विचिन्त्य ॥[5]**

कोलम्बियादेशे ‘स्टेन्ली कोरेन’ नामक वैज्ञानिकेन कुक्कुराणां आपद्भिः पूर्वं व्यवहारविषये शोधकार्यं कृतम् । तस्य शोधकार्ये कुक्कुराणां उपर्युक्तव्यवहार एव दृष्टिपथि आगतः ।[6] जापानदेशे १९९५ तमे ईस्वी

1 बृहत्संहिता,पाकाध्यायः,श्लोक७

2 श्रीमद्भागवतमहापुराण,तृतीयस्कन्ध, सप्तदशोऽध्यायः, श्लोक१०

3 बृहत्संहिता , श्वचक्राध्याय , श्लोक३

4 बृहत्संहिता , श्वचक्राध्याय , श्लोक१६

5 बृहत्संहिता , श्वचक्राध्याय , श्लोक१८

6 “Can dogs predict earthquake? A possible Auditory Answer” Stanley Coren, Psychology Department, University of British Columbia, Canada

वर्षे भूकम्पात् बहुदिनानि पूर्वं कुक्कुराणां विचित्रा ध्वनिः जनैः श्रुता |[1]तथैव १९७५तमे वर्षे चीन देशस्य हेचिङ्ग नगरे भूकम्पात् बहुदिनानि पूर्वं कुक्कुराः उन्मत्ता इव व्यवहारं कुर्वन्ति स्म|[2]
महाभारतस्य नवमे दिने भयंकरोत्पातस्य सूचनां प्राप्त्वा श्वानः विविधाः शब्दाः कुर्वन्ति -

**श्वानश्च विविधैर्नादैर्वाशन्तस्तत्र मारिष ||**[3]

## 4. गजः(Elephant)





रामायणे विभीषणः रावणं दुर्निमित्तान् सूचयति यत् गजाः मदरहितो भूत्वा नवग्रासानापि न खादन्ति –

**विमदा वरकुञ्जराः नवग्रासाभिनन्दिनः |**[4]

महाभारते पाण्डवानां जयः कौरवाणाञ्च पराजयस्य लक्षणान् प्रदर्शयन् कर्णः भगवान् श्रीकृष्णं प्रति वदति यत् गजाः परस्परं निष्टनन्ति, विकृत शब्दाश्च कुर्वन्ति | जलं ग्रासञ्चापि न स्वीकुर्वन्ति –

**निष्टनन्ति च मातङ्गा मुञ्चन्त्यश्रूणि वाजिनः | पानीयं यवसं चापि नाभिनन्दन्ति माधव ||**[5]

गजानां गण्डस्थले यदि सर्वदा मदमिव प्रतीयते तदा लोके भयकारकं भवति -

**अपूज्यपूजा पूज्यानामपूजा करिणीमदः |**[6]

वराहमिहिरेण गजानां निमित्तविषये यथा निर्दिष्टं तथैव इदानीं आधुनिकशोधोपरान्तमपि प्राप्तं वर्तते | तेन वर्णितं यत् -

**स्खलितगतिरकस्मात् त्रस्तकर्णोऽतिदीनः श्वसिति मृदु सुदीर्घं न्यस्तहस्तः पृथिव्याम् |**
**द्रुतमुकुलितदृष्टिः स्वप्नशीलो विलोमो भयकृदहितभक्षी नैकशोऽसृक्श कृत् कृत् ||**[7]

---

1 some days before 1995 kobe earthquake in japan some dogs were barking "frantically" and goats and other animals were showing obvious signs of fear - “Could Your Pet Save Your Life?” a book by Life Positive Publication

2 “Earthquake Prediction by Animals: Evolution and Sensory Perception” by Joseph L. Kischvink in Bulletin of Seismological Society of America, April 2000

3 महाभारत, भीष्म पर्व, अध्याय९९, श्लोक२७

4 रामायण, युद्धकाण्ड, दशमोध्यायः, श्लोक१७

5 महाभारत,उद्योग पर्व , अध्याय-१४३, श्लोक१२

6 विवेकविलासः, अष्टमोल्लासः, श्लोक१७

7 बृहत्संहिता, हस्तिचेष्टिताध्यायः, श्लोक-१२

यदि गजस्य गतिः अकस्मात् स्खलितः भवति, वित्रस्तश्रोत्रो भवति, अतीव दैन्यगत्या प्रचलति तथा च भूमौ विन्यस्तकरो मृदु कृत्वा चिरकालं श्वासं विमुञ्चति | तस्य दृष्टिः चकिता अर्द्धोन्मीलिता च भवति, बहुकालं यावत् स्वपिति | विपरीतगतिको भवति अर्थात् यत्र प्रेर्यते तत्र न याति, अनिष्टं भक्षयति, अनेक वारं पुरीषं करोति तदा लोके भयस्य आशंका भवति | आधुनिकैः वैज्ञानिकैरपि गजस्य व्यवहार विषये बहुशोधकार्यं कृतम् | यथा श्लोके निर्दिष्टं तथैव व्यवहारः वैज्ञानिकानां दृष्टिपथि आगतः | 'नेचर' नामक संस्था द्वारा विनिर्मिते वृत्तचित्रे(documentary) गजस्य भूकम्पात् पूर्वं तथैव व्यवहारं निर्दिष्टम् वर्तते यथा श्लोकेस्मिन् वर्णितम् | वृत्तचित्रे निर्दिष्टमस्ति यत् भूकम्पात् पूर्वं गजाः अकस्मादेव स्तब्धाः भवन्ति, वित्रस्तकर्णाः भूत्वा भूमौ करं संस्थाप्य बहुकालं यावत् स्वस्थाने सुदीर्घं श्वासिति |[1] वृत्तचित्रस्य एकं चित्रमत्र प्रदर्शितं वर्तते –




http://www.pbs.org/wnet/nature/category/episodes/

## 5.अश्वाः (Horse)



आपदाभिः पूर्वम् अश्वाः दीनतापूर्वक स्वरैः हेसन्ते –

**दीनमश्वाः प्रहेषन्ते नवग्रासाभिनन्दिनः ||[2]**

---

1 Nature (PBS production) "Can Animals Predict Disaster?" A documentary movie - http://www.pbs.org/wnet/nature/category/episodes/

2 महाभारत,उद्योग पर्व , अध्याय-१४३, श्लोक१७

पाण्डवानां जयः कौरवाणाञ्च पराजयस्य लक्षणान् प्रदर्शयता कर्णः भगवान् श्रीकृष्णं प्रति वदति यत् गजाः परस्परं निष्टनन्ति विकृतशब्दानि च कुर्वन्ति, अश्वाः अश्रूणि मुञ्चन्ति, जलं भोजनमपि च न स्वीकुर्वन्ति -

**निष्टनन्ति च मातङ्गा मुञ्चन्त्यश्रूणि वाजिनः |**
**पानीयं यवसं चापि नाभिनन्दन्ति माधव ||**[1]

यदि अश्वाः परस्परं विलोकयता शब्दः कुर्वन्ति तदा लोके भयं जनयन्ति -

**अन्योन्यं समुदीक्षन्ते हेष्यस्थानगता हयाः |**[2]

यदि अश्वाः पादैः भूमिं मृत्तिकां समुद्धरति , दिवा व रात्रौ यदि अकस्मात् हेसन्ते तदा लोके भयं निर्दिशति -

**त्रासन्तयो विभेषन्तो घोरात् पादसमुद्धृताः |**
**दिवसं यदि वा रात्रिं हेषन्ति सहसा हयाः ||**[3]

आपदाभिः पूर्वं वाजिनः गजाश्च अल्पभुक्त्वापि मलमूत्राधिकं निष्कासयन्ति –

**अल्पे भुक्ते पुरीषं च प्रभूतमिह दृश्यते |**
**वाजिनां वारणानां च मनुष्याणां च केशव ||**[4]

यदि संध्याकाले हयाः उपरि मुखं कृत्वा दीनतापूर्वकं रोदनं कुर्वन्ति चतुर्दिक्षु भ्रमणं च कुर्वन्ति तदा लोके भयं राज्ञः पराजयं च निर्दिशति

**संध्यायां सुप्रदीप्तायां तदा विन्द्यात् पराजयम् |**
**उन्मुखा रुदन्तो वा दीनं दीनं समन्ततः ||**[5]

यदि अश्वः रुक्षस्वरैः छिन्नशब्दं करोति तदा मृत्युं सूचयति -

**विच्छिद्यमाना हेषन्ते यदा रूक्षस्वरं हयाः ||**[6]

यदि अश्वाः गर्दभ इव शब्दं कुर्वन्ति अनवरतरूपेण उतिष्ठन्ति तिष्ठन्ति भ्रमणं कुर्वन्ति तदा पराजयं सूचयन्ति -

**खरवद्धीमनादेन तदा विन्द्यात् पराजयम् |**

---

1 महाभारत,उद्योग पर्व , अध्याय-१४३ श्लोक १२
2 भद्रबाहुसंहिता ,चतुर्दशोऽध्याय, श्लोकक१५२
3 भद्रबाहुसंहिता ,चतुर्दशोऽध्याय, श्लोकक१५४
4 महाभारत, उद्योगपर्व, अध्यायः१४३, श्लोक१२
5 भद्रबाहुसंहिता ,चतुर्दशोऽध्याय, श्लोकक१५५
6 भद्रबाहुसंहिता ,चतुर्दशोऽध्याय, श्लोकक१५६

**उत्तिष्ठन्ति निषीदन्ति विश्वसन्ति भ्रमन्ति च ||**[1]

यदि अश्वाः रोगेण आर्त्तः, पीडित इव शब्दं करोति मुखमुपरि कृत्वा दीनतापूर्वकं शब्दं कुर्वन्ति तदा नगरे भयं भवति -

**रोगार्त्ता इव हेयन्ते तदा विन्द्यात् पराजयम् |**
**ऊर्ध्वमुखा विलोकन्ते विन्द्याज्जनपदे भयम् ||**[2]

भूमौ किञ्चित् ग्रासं खादित्त्वा पूर्वं दिशि मुखं कृत्वा शब्दं कुर्वन्ति तदा लोके क्षुधाभयं क्लेशं जनयति -

**भूम्यां ग्रसित्वा ग्रासं तु हेषन्ते प्राङ्गमुखा यदा |**
**अश्वारोधाश्च बद्धाश्च तदा क्लिश्यति क्षुद्भयम् ||**[3]

यदि ग्रासादि अश्नन् अश्वाः सूर्यं प्रति पश्यति तदा लोके अग्निभयं भवति -

**हेषन्ते सूर्यमुद्वीक्ष्य तदाऽग्निभयमादिशेत् ||**[4]

यदि अश्वः शैवालयुक्त जले मुखं निक्षिप्य हींसनं करोति तदा अग्निभयं करोति -

**तदा शेवालजले वाऽपि मग्नं कृत्वा मुखं हयाः |**
**हेषन्ते विकृता यत्र तदाप्यग्निभयं भवेत् ||**[5]

यदि अश्वः रोमाणि उत्सृजन्ति तथा दीन खरगर्दभ इव रूक्षध्वनिः करोति अथवा मृत्तिका भक्षयति तदा भयं निर्दिशन्ति -

**रोमत्यजो दीनखरस्वराश्च पांशून् ग्रसन्तश्च भयाय दृष्टाः |**[6]

## 6. गौः (Cow)



1 भद्रबाहुसंहिता ,चतुर्दशोऽध्याय, क्ष्लोकक१५७
2 भद्रबाहुसंहिता ,चतुर्दशोऽध्याय, क्ष्लोकक१५८
3 भद्रबाहुसंहिता ,चतुर्दशोऽध्याय, क्ष्लोकक१६३
4 भद्रबाहुसंहिता ,चतुर्दशोऽध्याय, क्ष्लोकक१६७
5 भद्रबाहुसंहिता ,चतुर्दशोऽध्याय, क्ष्लोकक१६८
6 बृहत्संहिता, अश्वेङ्गिताध्यायः, श्लोक११

बृत्संहिताया उत्पाताध्याये प्राणिनां प्रसवादिविकृतिवशात् भविष्यत्काले संभावितानामुत्पातानां सूचना निर्दिष्टा वर्तते यत् पशूनां परयोनावन्ययोनावभिगमनं यदि भवति, तदा अशोभनम् भवति | तथा च गवामन्योन्यं परस्परं स्तनपाने सति, तथा वृषभा यदि अन्योन्यं स्तनं पिबन्ति तदा उत्पातः भवति | तस्मिन्नुत्पाते मासत्रयेण पराचक्रागमनं निःसंशयं जानीयात् -

**परयोनावभिगमनं भवति तिरश्चामसाधु धेनूनाम् |**
**उक्षाणो वान्योन्यं पिबति श्वा वा सुरभिपुत्रम् ||**
**मासत्रयेण विन्द्यात्तस्मिन्निःसंशयं परागमनम् |**[1]

वृषभाः यदा उपरि मुखं कृत्वा भयंकररूपेण गर्जनां कुर्वन्ति तथा स्वस्य ककुदं (hump on the back) निरन्तररूपेण चालयन्ति तदा लोके महान भयस्य आशंका भवति -

**ऊर्ध्वं वृषो यदा नर्देत् तदा स्याच्च भयंकरः |**
**ककुदं चलते वापि तदाऽपि स भयंकरः ||**[2]

यदि रात्रौ सर्वत्र गावः शब्दाः कुर्वन्ति तदा लोके कलहं भवति -

**गोध्वनिर्निशि सर्वत्र कलिर्वा दर्दुरः शिखी |**[3]

श्रीमद्भागवतमहापुराणे चतुर्दशे अध्याये यदा अर्जुनस्य द्वारकातः पुनरागमनं दीर्घकालोपरान्तमपि न भवति तदा महाराज युधिष्ठिरः तत्र दुर्निमित्तान् सूचयति यत् वत्साः गवां स्तनं न पिबन्ति, गावः अश्रूणि पातयन्ति –

**न पिबन्ति स्तनं वत्सा ना दुह्यन्ति च मातरः |**
**रुदन्त्यश्रुमुखा गावो न हृष्यन्त्यृषभा व्रजे ||**[4]

यथा व्यवहारः श्रीमद्भागवते निर्दिष्टं तथैव आधुनिक वैज्ञानिकाः अपि वदन्ति यत् आपदाभिः पूर्वं गावः दुग्धं न ददति |[5]

**गावो पादैर्भूमिं कुट्टयन्त्यश्च रोगान् |**[6]

यदि गावो खुरैः भूमिं विदारयन्ति तदा लोके रोगभयं भवति | तथा च -

**अकारणे क्रोशति चेदनर्थो भयाय रात्रौ वृषभः शिवाय |**[7]

---

1 बृहत्संहिता, उत्पाताध्याय, श्लोक ५५-५६

2 भद्रबाहुसंहिता ,चतुर्दशोऽध्याय, श्लोक१३९

3 विवेक विलास, जन्मचयनाम अष्टमोल्लासः ,श्लोक-१६

4 श्रीमद्भागवतमहापुराणे प्रथमस्कन्धे,चतुर्दशे अध्याय, श्लोक१९

5 Among domestic animals, reports of hens not laying eggs, **cows not giving milk,** or bees abandoning hives days, hours and before hurricanes, earthquakes and tsunamis - " Animals: A natural messenger for disasters" R.Tiwari, S.Tiwari,/Journal of Natural Products, Vol. 4(2011):03-04

6 बृहत्संहिता,गवेङ्गिताध्याय, श्लोक-२

7 बृहत्संहिता,गवेङ्गिताध्याय, श्लोक-२

यदि गावो रात्रौ निष्कारणमेव निरन्तरं शब्दं करोति तदा लोके भयं जनयति | गोभिः पशुभिश्च कृताः दारुणशब्दाः आपदां कारणं भवन्ति | केचन आधुनिक वैज्ञानिकाः (Prof. Dr. Madam Mohan Bajaj and Dr. Vijay Ray Singh, Department of Physics and Astrophysics, University of Delhi)[1] चिन्तयन्ति यत् गवां जन्तूनां च वधस्थलेषु यदा बृहत् संख्यायां कर्तनं भवति तदानीं तैः कृताः दारुणशब्दाः भूमौ गच्छन्ति | अनन्तरकाले ते एव चीत्कारशब्दाः भूकंपतरंगरूपेण प्रकटीताः भवन्ति|[2] तेषां शोधस्य आधारः सुप्रसिद्धः वैज्ञानिक आइन्सटाइन द्वारा प्रतिपादित पीडातरंगसिद्धान्तः EPW (Einsteinian Pain Waves) theory वर्तते |[3] तेषां सिद्धान्तः BIS (**B**ajaj-**I**brahim-**S**ingh) Theory नाम्ना प्रसिद्धः वर्तते |

## 7. उष्ट्र, गर्दभाः(Camel, Donkey)



रामायणे युद्धकाण्डस्य दशमे सर्गे विभीषणः रावणं दुर्निमित्तान् सूचयन्ति यत् गर्दभानां उष्ट्राणां च व्यवहारे विचित्रता परिदृश्यन्ते तेषां अश्रूणि पतन्ति चिकित्सयापि ते स्वास्थ्यं न प्राप्नुवन्ति -

**खरोष्ट्राश्वतरा राजन् भिन्नरोमाः स्रवन्ति च |**
**न स्वभावेऽवतिष्ठन्ते विधानैरपि चिन्तिताः ||**[4]

1 Etiology of Earthquakes: A New Approach - M. M. Bajaj, M. S. M. Ibrahim, Vijay Raj Singh, Hira Bhaiya Prakashan, Indore,1995

2 Several earthquakes have the history of millions of animals being butchered in or near the high risk seismic zones. Hence the suspicion and the scientific inquiry that organising the butchering of animals in the abattoirs worldwide has something to do with the quakes. Nociceptive waves (or the waves generated by the immense noise by the animals on the verge of being butchered) in shear-wave splitting which is related to seismic anisotropy. This splitting is associated with the cracks in the crust aligned by stress. The origin of earthquakes due to the interaction of nociception waves with gravity waves is critically examined in the book. An earthquake of 8 Richter occurs only when the resonant frequency is extremely high. Low frequency resonances lead to earthquakes of 0.1 to 0.2 Richter. Low frequency resonances are hardly felt or realised by the ordinary people. High frequency resonances (originating due to the slaughter of millions of animals daily for years together) lead to powerful singularities with the gravity waves

*Book Review by Romula D'Silva-**Understanding Earthquakes,** A Plea to Stop Animal Slaughter, Via Science Now! from EVU News, Issue 1 /1998*

3 Acoustic anisotropy leads to a very strong anisotropic stress on a rock. The daily butchering of thousands of animals continually for several years generates acoustic anisotropy due to **Einsteinian Pain Waves (EPW)** emitted by dying animals. And the accumulated acoustic anisotropy is found to be related with the stress history of rocks. EPW travel a great distance with time, abattoirs of one country may lead to havoc in another country.

4 रामायणे युद्धकाण्ड,दशमे सर्ग, श्लोक१८

यदा गर्दभः उच्चैः रसति(braying of donkey) शब्दं वा करोति तदानीमेव यदि अन्येऽपि नखी जन्तवः शब्दाः कुर्वन्ति तदा लोके दुर्भिक्षादिनां सूचनां ददति -

**खरस्य रसतश्चापि समकालं यदारसेत् |**
**अन्यो वा नखरो जीवो दुर्भिक्षादि तदा भवेत् ||**[1]

श्रीमद्भागवतमहापुराणे सप्तदशे अध्याये दित्याः पुत्राणां जन्मकाले लोके अनेके उत्पाताः प्रदर्शिताः| तत्र निर्दिष्टम् यत् गर्दभानां समूहः स्वखुरैः(by hoofs) पृथ्वीं खनन्ति तथा च शब्दं कुर्वन्तः उन्मत्ताः इव इतस्ततः भ्रमन्ति तदा लोके भयं जनयन्ति -

**खराश्च कर्कशैः क्षत्तः खुरैघ्नन्तौ धरातलम् |**
**खार्काररभसा मत्ताः पर्यधावन् वरूथशः ||**[2]

## 8. शिवाः (Jackal)




संस्कृतवाङ्गमये सर्वाधिकतया शिवासंबंधितानां शकुनानां वर्णनं प्राप्यते | बृत्संहितायां शिवया कृतैः विभिन्नैः शब्दैः फलं विवेचितं वर्तते यत् शिवा यदि 'याहि' शब्दं करोति तदा अग्निभयं करोति | 'टाटा' शब्दं करोति तदा मृत्युं बन्धवादिकं च वेदयति | 'धिक् धिक्' शब्दं करोति तदा दुष्कृतिमतिकष्टं कथयति | ज्वालासंयुता ध्वनिः देशनाशिनी भवति -

**याहीत्यग्निभयं शास्ति टाटेति मृतवेदिका|**
**धिग्धिग्दुष्कृतिमाचष्टे सज्वाला देशनाशिनी ||**[3]

युद्धकाण्डस्य दशमे सर्गे विभीषणः रावणं दुर्निमित्तान् सूचयन्ति यत् सन्ध्याद्वये शिवाः नगरस्य समीपमागत्य अमङ्गलसूचकशब्दान् कुर्वन्ति –

1 विवेक विलास, जन्मचयनाम अष्टमोल्लासः ,श्लोक१८
2 श्रीमद्भागवतमहापुराण,सप्तदशे अध्याये, श्लोक ११
3 बृहत्संहिता, शिवारुताध्यायः, श्लोक६

**उपपन्नाश्च संध्ये द्वे व्याहरन्त्यशिवं शिवाः ||**[1]

युद्धकाण्डस्य त्रयोविंशतितमे अध्याये श्रीरामः लक्ष्मणं प्रति उत्पातानां वर्णनं कुर्वन्ति यत् शिवाः अशुभ शब्दाः कुर्वन्तः लङ्कायाः अशुभस्य सूचनां ददति -

**शिवाश्चाप्यशुभान् नादान् नदन्ति स्महाभयान् ||**[2]

रामायणस्य युद्धकाण्डस्य १०६ तमे अध्याये श्रीरामः मातलिं रावणस्य पराजयस्य अशुभ निमित्तान् सूचयन्ति यत् रावणस्य रोषावेश पूर्णं मुखं प्रति दृष्टवती स्वमुखात् अग्निं निष्कासयति शिवाः अमङ्गलसूचकं शब्दानि कुर्वन्ति -

**गृध्रैरनुगताश्चास्य वमन्त्यो ज्वलनं मुखैः |**
**प्रनेदुर्मुखमीक्षन्त्यः संरब्धमशिवं शिवाः ||**[3]

बृत्संहितायां वराहमिहिरः पूर्वाचार्याणां वचनं वर्णयति यत् शृगालस्य शब्दे सति शस्त्रभयं भवति -

**क्रोष्टुकनादे च तथा शस्त्रभयं मुनिवचश्चेदम् |**[4]

अर्जुनस्य शंखस्य भयङ्करं शब्दं श्रुत्वा द्रोणाचार्य उत्पातान् सूचयन्ति यत् उदयकालिकसंध्यायां अस्तकालिकसंध्यायां च शिवाः महान् भयस्य सूचनां ददति -

**उदयास्तमने संध्ये वेदयन्ती महद्भयम् |**
**शिवा च वा शते घोरं तत् पराभवलक्षणम् ||**[5]

युद्धकाले शिवा सेनाया मध्येन धावन् विनाशस्य सूचनां ददाति -

**गोमायुरेषु सेनायां रुदन् मध्येन धावति |**
**अनाहतश्च निष्क्रान्तो महद् वेदयते भयम् ||**[6]

यदा दिवाकाले शिवाः विकृतं सिक्तं वा भूत्वा नगरं प्रति प्रविशन्ति तदा राजवधं भवतीति भद्रबाहु संहितायां निर्दिष्टम् -

**यदा द्वारेण नगरं शिवा प्रविशते दिवा |**
**वास्यमाना विकृता वा तदा राजवधो ध्रुवम् ||**[7]

---

1 युद्धकाण्डस्य दशमे सर्गे श्लोक२०

2 युद्धकाण्डस्य त्रयोविंशतितमे अध्याये श्लोक११

3 रामायण,युद्धकाण्ड,अध्याय१०६, श्लोक२७

4 बृहत्संहिता, उत्पाताध्याय, श्लोक६२

5 महाभारत, विराट पर्व , अध्याय-४६, श्लोक २५

6 महाभारत, विराट पर्व , अध्याय-४६, श्लोक २८

7 भद्रबाहुसंहिता ,चतुर्दशोऽध्याय, श्लोक११५

तथा च उक्तं यत् यदि शिवा अन्तःपुरे, द्वारे, नगरे, तीर्थे, अट्टालिकायां आपणे वा प्रविशति तदा सौख्यनाशं सूचयति -

**अन्तःपुरेषु द्वारेषु विष्णुमित्रे तथा पुरे ।**
**अट्टालकेऽथ हट्टेषु मधु लीनं विनाशयेत् ॥[1]**

श्रीमद्भागवतपुराणस्य तृतीयस्कन्धस्य सप्तदशे अध्याये दित्याः राक्षसपुत्राणां जन्मकाले लोके अनेके उत्पाताः प्रदर्शिताः यत् ग्रामे शृगालानाम् उलूकानां च भयङ्करशब्दाः भवन्ति तथा च शिवाः मुखात् अग्निं वमन्त्यः अमङ्गलशब्दाः कुर्वन्ति –

**अन्तर्ग्रामेषु मुखतो वमन्त्यो वह्निमुल्बणम् ।**
**सृगालोलूकटङ्कारैः प्रणेदुरशिवं शिवाः ॥[2]**

प्रथमस्कन्धस्य चतुर्दशे अध्याये यदा अर्जुनस्य पुनरागमनं दीर्घकालोपरान्तमपि द्वारकातः आगमनं न भवति तदा महाराजयुधिष्ठिरः तत्र दुर्निमित्तान् सूचयति यत् शिवाः अशुभस्य पूर्वसूचनां प्राप्तवा सूर्यं प्रति मुखं कृत्वा रोदनं कुर्वन्ति तथा च तासां मुखात् अग्नि च निष्कसति –

**शिवैषोद्यन्तमादित्यमभिरौत्यनलानना**
**मामङ्ग सारमेयोऽयामभिरेभत्यभीरुवत् ॥[3]**

महाभारतस्य नवमे दिने युद्धक्षेत्रे शिवाः बाहुल्येन आगत्य भयं निर्दिशन्ति -

**समन्ततश्च दृश्यन्ते गोमायुबलवायसाः ।[4]**

द्रोणाचार्यः अश्वत्थामां अशुभ शकुनं सूचयन्ति अमङ्गलसूचिकाः शिवाः महान् भयस्य सूचनां ददति तथा च सूर्यं प्रति मुखं कृत्वा भयानक शब्दानि कुर्वन्ति, तासां मुखं च प्रज्वलितं दृश्यन्ते -

**शिवाश्चैवाशिवा घोरा वेदयन्त्यो महद् भयम् ॥[5]**

दिवाकाले यदि शृगालाः शब्दाः कुर्वन्ति तदा जगति भयं सूचयन्ति -

**शृगालोऽह्निलपेद्रात्रौ तित्तिरिश्च जगद्भिये ॥[6]**

1 भद्रबाहुसंहिता ,चतुर्दशोऽध्याय, श्लोक११६
2 श्रीमद्भागवत,तृतीय स्कन्ध, सप्तदशे अध्याय,श्लोक९
3 श्रीमद्भागवतमहापुराण,प्रथमस्कन्धे, चतुर्दशोऽध्यायः, श्लोक१२
4 महाभारत, भीष्म पर्व, अध्याय९९, श्लोक२७
5 महाभारत , भीष्मपर्व ,अध्याय-११२, श्लोक८
6 विवेक विलास, जन्मचयनाम अष्टमोल्लासः ,श्लोक१७

## 9. कीट (Insects)





भीष्म पर्वणि महर्षि वेदव्यासः धृतराष्ट्रं प्रति भयसूचकान् उत्पातान् प्रदर्शयति यत् उदयकाले शतशः कीटाः लोके दृश्यन्ते –

**अरुणोदये प्रदृश्यन्ते शतशः शलभव्रजाः ||**[1]

यदि वल्मीकः मनुष्याणां निवासस्थले प्रभूतसंख्यया गृहनिर्माणं करोति, तथा च यदि नगरात् अरण्ये गच्छन्ति तदा लोके महान भयं जनयति-

**वल्मीकस्याशु जनने मनुजस्य निवेशने |**
**अरण्यं विशतश्चैव तत्र विद्यान्महद् भयम् ||**[2]

यत्र यत्र पीपिलिकायाः समूहः स्वस्थानात् धावन्ति तत्र तत्र देशे राष्ट्रस्य भङ्गं निर्दिशन्ति -

**महापिपीलिकावृन्दं सन्द्राकाभृत्यविप्लुतम् |**
**तत्र तत्र च सर्वं तद्राष्ट्रभङ्गस्य चादिशेत् ||**[3]

यत्र पिपीलिकासमूहः विस्फुरितो भवति क्षत विक्षतो भवति म्रियते च तदा तत्र महान भयं भवति -

**महापिपीलिकाराशिर्विस्फुरन्ती विपद्यते |**
**उद्यानुतिष्ठते यत्र तत्र विनद्यान्महद् भयम् ||**[4]

सर्पाः क्षुद्रजन्तवश्च परस्परं युद्धं कुर्वन्तः दृश्यन्ते तदा भयंकरः वातः प्रवहति -

**नृनागबद्धावरसंगरस्तदा भवन्ति वाताः समुपस्थितान्ताः ||**[5]

---

1 महाभारत,भीष्म पर्व,अध्याय-२, श्लोक२९
2 भद्रबाहुसंहिता ,चतुर्दशोऽध्याय, श्लोक५१
3 भद्रबाहुसंहिता ,चतुर्दशोऽध्याय, श्लोक५२
4 भद्रबाहुसंहिता ,चतुर्दशोऽध्याय, श्लोक५३
5 भद्रबाहुसंहिता,सप्तविंशतितमोऽध्याय, श्लोक१

## 10. मृगाः (deer)





मृगः यदि उच्चैः भयावहं शब्दं करोति तदा ग्रामस्य विनाशं सूचयति तथा यदि सेनाया दक्षिणस्यां दिशि स्थितस्तत्र च रविदीप्तः सूर्याभिमुखो महाशब्दः सेनाया विनाशं करोति –

**भैरवमुच्चैर्विरुवन् मृगोऽसकृद् ग्रामघातमाचष्टे |**
**रविदीप्तो दक्षिणतो महास्वनः सैन्यघातकरः ||[1]**

यदि वन्यमृगाः ग्रामसीमायां स्थिताः रोदनं कुर्वन्तः तत्रैव यदि तिष्ठन्ति, तदा तस्मिन्नेव दिने तत्र भयं निर्दिशन्ति | यदि तस्मात् सीमाप्रदेशात् गच्छन्ति तदा अतीत भयमावेदयन्ति | तथैव रोदमानाः यदि ग्रामं प्रति समागच्छन्ति तदा आगामि भयान् निर्दिशन्ति | यदि ग्रामस्य परितः भ्रमन्ति तदा ग्रामं निर्जनं जनशून्यं वा करोति -

**सीमागता वन्यमृगा रुवन्तः स्थिता व्रजन्तोऽथ समापतन्तः |**
**संप्रत्यतीतैष्यभयानि दीप्ताः कुर्वन्ति शून्यं परितो भ्रमन्तः ||[2]**

## 11.सूकर, बिडाल(Pig and Cat)





महर्षि वेदव्यासः भयसूचक उत्पातानां वर्णनं कुर्वन्तः धृतराष्ट्रं प्रति वदन्ति यत् बिडालाः सूकराश्च रात्रौ कूर्दनं कुर्वन्तः परस्परं युध्यन्ति एवं प्रकारेण प्रतिदिनं दृश्यते -

**अन्तरिक्षे वराहस्य वृषदंशस्य चोभयोः |**
**प्रणादं युद्ध्यतो रात्रौ रौद्रं नित्यं प्रलक्षये ||[1]**

---

1 बृहत्संहिता, संध्यालक्षणाध्यायः, श्लोक३

2 बृहत्संहिता,मृगचेष्टिताध्यायः, श्लोक१

## 12 . अन्ये जन्तवः (Other animals)

खगाः पक्षिणो मृगादि अरण्यजातयः भवन्ति| उदयकाले अस्तकाले अर्थात् संध्याकाले यदा ते भीषण स्वरं कुर्वन्ति तदा लोके महान जनघातं भवति –

**असितविचित्रनीलपरुषो जनघातकरः |**
**खगमृगभैरवस्वररुतैश्च निशाद्युमुखे||**[2]

सञ्जयः कौरवसेनायाः कृते अशुभं सूचयति यत् दक्षिणदिशा भयङ्कर शब्दानि कुर्वाणः पशवः अशुभदर्शनाः शिवाश्च आगच्छन्ति -

**मृगाश्च घोरसंनादः शिवाश्चाशिवदर्शनाः |**
**दक्षिणेन प्रयातानामस्माकं प्राणदेस्तथा||**[3]

ग्राम्यविहगा यदि वने चरन्ति, तथा वन्याः पक्षिणो निर्भया नगरं प्रविशन्ति | अथवा दिवसचराः पक्षिणः काकादयो रात्रौ चरन्ति | रात्रिचारिणः कौशिकादयो दिवसे चरन्ति | तदा लोके भयदा भवति –

**पुरपक्षिणो वनचरा वन्या वा निर्भया विशन्ति पुरम् |**
**नक्तं वा दिसचराः क्षपाचरा वा चरन्त्यहनि ||**[4]

अरण्यप्राणिनः पक्षिणो वा सूर्योदयास्तसमयोर्मण्डलं चक्राकारं रचयन्तः अथवा दीप्तायां दिशि अतीव वाच्यमाना दृश्यन्ते | अरण्यप्राणिनः पक्षिणो सूर्योदयास्तसमये तत्कालं रवेर्वशेन या दीप्ता दिक् भवति , तस्यां दिशि मुखं कृत्वा मण्डलाकारं रचयन्तः समेता अतीव शब्दमानाः दृश्यन्ते तदा लोके भयं निर्दिशन्ति -

**सन्ध्याद्वयेऽपि मण्डलमाबध्नन्तो मृगा विहङ्गा वा |**
**दीप्तायां दिश्यथवा क्रोशन्तः संहता भयदाः ||**[5]

द्रोणाचार्यः अश्वत्थामां अशुभ शकुनं सूचयन्ति यत् सर्वासु दिक्षु पशवः पक्षिणश्च घोरशब्दानि कुर्वन्ति गृध्राः कौरवसेनायां प्रविशन्तः भयं सूचयन्ति -

**दिक्ष्वशान्तानि घोराणि व्याहरन्ति मृगद्विजाः |**
**नीचैर्गृध्रा निलीयन्ते भारतानां चमूं प्रति ||**[6]

---

1 महाभारत,भीष्म पर्व,अध्याय-२, श्लोक२५
2 बृहत्संहिता, आदित्यचाराध्यायः, श्लोक३९
3 महाभारत ,खण्ड- ४ , अध्याय-८८ , श्लोक५
4 बृहत्संहिता, उत्पाताध्याय, श्लोक६५
5 बृहत्संहिता, उत्पाताध्याय, श्लोक६६
6 महाभारत, भीष्म पर्व, अध्याय-११२, श्लोक६

महर्षि वेदव्यासः दुर्निमित्तान् सूचयन्ति यत् चतुर्षु दिक्षु पशवः पक्षिणश्च अनर्थं दर्शयन्तः भयङ्करः शब्दानि कुर्वन्ति तेषां मुखानि प्रज्वलितानि दृश्यन्ते -

**दिक्षु प्रज्वलितास्याश्च व्याहरन्ति मृगद्विजाः |**
**अत्याहितं दर्शयन्तो वेदयन्ति महद् भयम् ||**[1]

तथा च विकृताङ्गानां जन्तूनां उत्पत्तिः आधिक्येन भवति तदापि आपदां सूचना ज्ञेया | नवजातानां पशूनां पञ्चपादाः, मस्तकद्वयं, द्विपुच्छः, चत्वारि नेत्राणि भवन्ति –

**जायन्ते विवृतास्याश्च व्याहरन्तोऽशिवा गिरः |**
**त्रिपदाः शिखिनस्ताक्ष्यार्श्चतुर्दंष्ट्रा विषाणिनः ||**
**त्रिविषाणाश्चतुर्नेत्राः पञ्चपादा द्विमेहनाः |**
**द्विशीर्षाश्च द्विपुच्छाश्च दंष्ट्रीणः पशवोऽशिवाः ||**[2]

वेसरस्य उत्पत्तिं( अश्वस्य गर्दभेण संयोगात् यस्य उत्पत्तिः भवति ) त्यक्त्वा यदि जन्तवः अन्ययोनिषु मैथुनं कुर्वन्ति तदा देशनाशाय भवन्ति -

**परयोनिषु गच्छन्तो मैथुनं देशनाशनाः |**
**अन्यत्र वेसरोत्पत्तेर्नृणां चाजातिमैथुनात् ||**[3]

तथैव सर्पमूषकमार्जारमत्यान् त्यक्त्वा तदि अन्ये पशवः स्वजातेः पशोः मांसभक्षणं करोति तदा लोके दुर्भिक्षं कुर्वन्ति |[4]

शोधपत्रस्य आरम्भे वर्णिताः ये प्राणिनः सर्वाधिकतो आपदां ज्ञातुं समर्थाः भवन्ति तेषां 'शकुन' संज्ञा प्राचीनाचार्यैः प्रदत्ता | तेषां शब्दवशात् आपदां ज्ञानं निर्दीष्टम् | यदि शकुन एकस्मिन् स्थाने रुदन् सकलमेव दिनं तिष्ठति, तदा सप्तभिर्दिनैः ग्रामविनाशं करोति | यदि एकस्मिन्नैव स्थाने शकुनः मासद्वयं यावत् शब्दं करोति तदा नगरस्य नाशं करोति | मासत्रयं यावत् यदि शब्दं करोति तदा देशस्य विनाशं करोति |[5]

राजा बल्लालसेनकृते अद्भुतसागरग्रन्थे तु भौमाश्रयाध्याये प्रसवाद्भुतावर्त, सर्वशाकुनाद्भुतावर्त, नानामृगविहगाद्भुतावर्त्त, गजाद्भुतावर्त्त, अश्वाद्भुतावर्त्त, वृषमहिषाद्भुतावर्त्त, विडालाद्भुतावर्त्त, शुनकाद्भुतावर्त्त, शृगालाद्भुतावर्त्त, गृहगोधिकाद्भुतावर्त्त, पिपीलिकापतङ्गमक्षिकमशकलूताभ्रमर-भेकाद्भुतावर्त्त, पोतक्यद्भुतावर्त्त, कृष्णपेचिकाद्भुतावर्त्त, वायसाद्भुतावर्त्त इत्यादि प्राणिनां विचित्र व्यवहारैः सह संबद्ध आवर्त्तानां चर्चा प्राप्यते, परन्त्वीदानीं पर्यन्तं ग्रन्थस्य भौमाश्रयः प्रकाशितः न वर्तते | अतः तस्य प्रकाशनोपरान्तं आपद्भिः पूर्वं प्राणिनां विचित्र व्यवहार विषये इतोऽपि अधिकं ज्ञानं भविष्यति|

1 महाभारत, भीष्म पर्व, जम्बूखण्डविनिर्माणपर्व,अध्याय-३ , श्लोक२४
2महाभारत, भीष्म पर्व, जम्बूखण्डविनिर्माणपर्व,अध्याय-३ , श्लोक३-४
3 बृहत्संहिता,शाकुनाध्यायः,श्लोक६६
4 बृहत्संहिता,शाकुनाध्यायः,श्लोक६५
5 बृहत्संहिता,शाकुनाध्यायः,श्लोक६४

न केवलमद्भुतसागरमपितु अन्येऽपि बहवो संहिताग्रन्थाः विविध पाण्डुग्रन्थागारेषु विद्यमानाः वर्तन्ते | यथा कर्नाटक राज्यस्य मैसूरनगरे प्राच्य विद्या प्रतिष्ठाने एते पाण्डुलिपिरुपेण संहिता ग्रन्थाः सन्ति |[1] -

| Serial number | Manuscript number | Title of the work |
|---|---|---|
| 29256 | P.10387/3 | इन्द्रचापफल |
| 29259 | P.10440/3b | इन्द्रचापफलटीका |
| 29371 | B.586/4 | उपराग चिन्तामणि |
| 30123 | P.3804/18 | ग्रहयुद्धफलम् |
| 31512 | A.47/19 | पितामह संहिता |
| 31979 | P.9942/4 | महासंहिता |
| 32850 | P.4665 | वृद्धगार्ग्यसंहिता |
| 32853 | P.4880/2 | वृद्धयावनम् |
| 32854 | P.5955/17 | वृद्धवाशिष्ठम् |
| 330120 | P.5048/1 | संहिताशिरोमणि |
| 31182 | P.7629/1 | नारदीय संहिता |

## संदर्भग्रन्थानि, शोधपत्राणि -


- अद्भुतसागर, श्रीमद्बल्लासेनदेवप्रणीत, चौखम्बा सुरभारती प्रकाशन, वाराणसी , २००६
- अथर्ववेदसंहिता, श्रीमत्सायणाचार्यविरचित, कृष्णदास अकादमी,वाराणसी, संवत् २०४५
- नारदसंहिता, नारदमहामुनिप्रणीता, चौखम्बा संस्कृत भवन,वाराणसी, संवत् २०६५
- बृहत्संहिता, वराहमिहिरविरचित, चौखम्बा विद्याभवन,वाराणसी,२००९
- भद्रबाहुसंहिता, डा. नेमिचन्द्र ज्योतिषाचार्य, भारतीय ज्ञानपीठ,२००९
- मयूरचित्रकम्, देवर्षि नारद विरचितम् , चौखंभा संस्कृत भवन, वाराणसी, संवत२०६५
- वाल्मीकि रामायण, गीताप्रेस, गोरखपुर, संवत् २०६०
- विवेक विलास, मुनिवर्यजिनदत्तसूरीश्वरप्रणीतम् , आर्यावर्त संस्कृति संस्थान, दिल्ली-९४, ईस्वी सन् – २००८
- महाभारत , गीताप्रेस, गोरखपुर , संवत् २०५५
- भविष्यपुराण, गीताप्रेस गोरखपुर , संवत् २०४३
- श्रीमद्भागवतमहापुराण, गीताप्रेस गोरखपुर, संवत् २०६६
- Brihat Samhita, M.Ramakrishna Bhatt, Motilal Banarasidas, Delhi-07, 1987
- Descriptive Catalogue of Sanskrit Manuscripts, volume-9, Oriental Research Institute, Mysore, 1983
- Etiology of Earthquakes: A New Approach - M. M. Bajaj, M. S. M. Ibrahim, Vijay Raj Singh, Hira Bhaiya Prakashan, Indore,1995


1 This list is taken from Descriptive Catalogue of Sanskrit Manuscripts, volume-9, Oriental Research Institute, Mysore, 1983

1. Nature (PBS production) “Can Animals Predict Disaster?” A documentary movie - http://www.pbs.org/wnet/nature/category/episodes/
2. “Natural early warning system for tsunami” Paper presented in International seminar Disaster Early Warning System, surabaya 2005 by Haryo Dwito Armono and Suntoyo
3. “Animal Modeling of Earthquakes and Prediction Markets” by Adi Schytzer and Yisrael Schnytzer, Department of Economics and Life Sciences, Bar ILan University, Israel
4. “Predicting the unpredictable; evidence of pre-seismic anticipatory behavior in the common toad” by R.A. Grant & T. Hailliday. Journal of Zoology, Department of life Sciences, The Open University, Milton Keynes, UK & Oxford,UK
5. “Earthquake Prediction through Animal Behavior : A Review” by Neeti Bhargav, V.K.Katiyar and P.Pradhan, Indian Journal of Biomechanics: Special Issue (7-8march 2009)
6. “Earthquake Prediction by Animals: Evolution and Sensory Perception” by Joseph L. Kischvink in Bulletin of Seismological Society of America, April 2000
7. “Unusual Animal Behavior Prior to Earthquakes: A Survey in North-West California” by David Jay Brown & Rupert Sheldrake
8. “Abnormal Animal Behavior and the Prediction of Earthquakes” by William K. Tong , Department of Earth Sciences, Northeastern Illinois University, august 1988
9. “Could Your Pet Save Your Life?” a book by Life Positive Publication
10. “ Animals: A natural messenger for disasters” R.Tiwari, S.Tiwari,/Journal of Natural Products, Vol. 4(2011):03-04
11. “Rocks That Crackle and Sparkle and Glow: Strange Pre-Earthquake Phenomena” Journal of Scientific Exploration, Vol.17, No.1,pp.37-71, 2003 Friedemann T. Freund, Department of Physics, San Jose State University, NASA Ames Research Center, Moffett Field, CA 94035-1000
12. “Can Animals Predict Disaster? : A Review” Lisa Snay, Massachusetts Academy of Mathematics and Science
13. “Ground Water Chemistry Changes before Major Earthquakes and Possible Effects on Animals” Rachel A. Grant, Tim Halliday, Werner P. Balderer, Fanny Leuenberger, Michelle Newcomer, Gary Cyr and Friedemann T. Freund , International Journal of Environmental Research and Public Health 2011, 8, 1936-1956; doi:3390/ijerph8061936
14. “Search for earthquake precursors in multidisciplinary data monitoring of geophysical and biological parameters” O. Yu. Schmidt United Institute of Physics of the Earth, Russian Academy of Sciences, ul. Bolshaya Gruzinskaya , Moscow, Russia . Natural Hazards and Earth System Sciences, European Geosciences Union(2003)
15. “Listen to the Animals” by Rupert Sheldrake , The Ecologist March 2005.

*********